ॐ

    

## श्रीमद्-आद्य-शङ्कर-भगवत्पाद-परम्परागत-मूलाम्नाय-सर्वज्ञ-पीठम्
## श्री-काञ्ची-कामकोटि-पीठम्
## जगद्गुरु-श्री-शङ्कराचार्य-स्वामि-श्रीमठ-संस्थानम्

# ॥ शिव-सहस्रनाम-स्तोत्रम् ॥

## विष्णु-कृतम्, लिङ्ग-पुराण-अन्तर्गतम्

### शिव-तोषिणी-व्याख्याम् अनुसृत्य शोधितम्

### Purana Background

Once Mahavishnu worshipped Bhagavan Shiva by a thousand lotuses. But one lotus collected for that disappeared. He offered His own eye which was akin to a lotus. Shiva appeared and bestowed His Friend the eye and additionally the Chakra.

The sthala purana says that this happened at Thiruveezhimizhalai kshetram in Tiruvarur District of Thamizhagam. Due to this the Swami there is known as Netrarpaneshvara (in Tamil Veezhinathar).

The names uttered by Mahavishnu to worship Shiva at that occasion are given in the 98th Adhyaya of the Linga Purana Purvardha. Researchers say that there are 11 Shiva Sahasranamas. But the speciality of this is unique in

that it was composed by the Supreme God Vishnu to worship the Supreme God Shiva.

A scholar by name Ganesha Ballala has composed a vyakhyana on the Linga Purana by name “Shiva Toshini”.

**Chanting this for unity**

Our Shri Chandrashekharendra Sarasvati Shricharana, Shankaracharya of Kanchi Kamakoti Peetam, has given the following benefit for this Sahasranama -

“Due to the state of the times, disunity is seen nowadays at various levels. Due to this, between spouses, siblings, parents-children and such surrounding family, friends, institutions, communities, regions and nations, separation, quarrels and even upto wars may happen. Chanting this is an excellent remedy to that.”

We can understand that the Acharya has stated this effect for this stotra signifying unity of Hari-Hara. It is also notable that in “Advaita Akshara Malika”, the golden jubilee publication of Advaita Sabha, an institution of our Shrimatam, the very first article titled “Shiva Vishnu Abheda in Bhagavatpada Siddhanta” was composed by the Acharya Himself.

May Hari-Hara, and our Shricharana who advised “Maitreem Bhajata” bless us with unity, which is the practical form of Advaita!

Jaya Jaya Shankara Hara Hara Shankara!

# शिव-नाम-महिमा

स्वकीयैः स्त्रोतोभि·र्जग·दखिल·माक्रामति कलौ
निमग्ना·स्ते वर्णा·श्रम-नियत-धर्माः स्फुट·मिदम्।
प्रलीना ध्याना·दि·र्भजन-सृति·रेका पुन·रये
परित्रातुं विश्वं पुर-भि·दभिधे त्वं विजयसे॥

—तिरुविसैनल्लूर्-श्रीधर-वेङ्कटेशार्याणाम् आख्याषष्टौ ३ पद्यम्

**Glory of Shiva Nama**

When the deluge of Kali has inundated the entire world, the dharma-s enjoined for the varnashrama-s have become submerged. The methods of worship like meditation have also disappeared. This being clear, oh Shiva Nama, you alone shine with success for protection of this world.

(Verse 3 of the Ākhya Shashti of Tiruvisainallur Shridhara Venkatesha Ayyaval)

# शिव-भक्ति-महिमा

हरि·स्ते साहस्रं कमल-बलि·माधाय पदयोः
य·देको·ने तस्मिन् निज·मुदहर·न्नेत्र-कमलम्।
गतो भ·क्त्युद्रेकः परिणति·मसौ चक्र-वपुषा
त्रयाणां रक्षायै त्रि-पुर-हर जागर्ति जगताम्॥

—शिव-महिम्नः स्तोत्रे १९ पद्यम्

O destroyer of the three asura fortresses! When Mahavishnu was placing a thousand lotuses at Your feet, one disappeared. So He took and offered His own eye which was akin to a lotus. This high devotion took the form of the Sudarshana chakra which You gave Him and protects the three worlds!

(Verse 19 of the Shiva Mahimnah Stotram of Pushpadanta)

# सङ्कल्पः

ममोपात्त-समस्त-दुरित-क्षय-द्वारा श्री-परमेश्वर-प्रीत्यर्थम् -

- बहु-स्तरे अस्मिन् मानव-समाजे दम्पतिषु भ्रातृषु स्वसृषु मातृषु पितृषु पुत्रेषु दुहितृषु एवमादि-कुटुम्ब-परिवारेषु सखिषु स्थापनेषु जन-समुदायेषु राज्येषु राष्ट्रेषु इत्येवं जनानां परस्परम् अविश्वास-अप्रीति-प्रभृतिभिः कारणैः अनानुकूल्य-, प्रातिकूल्य-,कलह-,भेद-भाव-,विच्छेद-,शत्रु-भाव-,युद्धादीनाम् अनिष्टानां सम्भाव्यमानतया श्री-परमेश्वरस्य प्रसादेन तस्य सर्वस्य परिहारार्थम्

- “जनन्याः पृथिव्याः काम-दुघायाः जनकस्य देवस्य च सकल-दयालोः शिशवः वयम्” इति भावस्य उत्पत्त्या सर्वेषां परस्पर-आर्जव-,प्रीति-,विश्वास-, मृदु-वचनता-,आनुकूल्य-,ऐक्य-भाव-,सिद्ध्यर्थम्
- सर्वेषां परस्पर-सहयोगेन परस्पर-उपकारेण परस्पर-रक्षणेन ऐहिक-आमुष्मिक-पुरुषार्थ-प्राप्तेः मार्गे अधर्म-त्याग-पूर्वक-धर्म-परिपालन-आत्मके गमनार्थम्
- तद्-द्वारा सर्वेषां शान्त-सुखमय-समृद्ध-जीवन-सिद्ध्यर्थं दुःख-भाक्त्व-परिहारार्थं सुखित्व-निरामयत्व-भद्र-दर्शकत्व-सिद्ध्यर्थं च

श्रीमत्-लिङ्ग-महापुराण-प्रोक्त-विष्णु-कृत-शिव-सहस्रनाम-स्तोत्र-पारायणं करिष्ये।

# स्तोत्रम्

अस्य श्री-शिव-सहस्र-नाम-स्तोत्र-महा-मन्त्रस्य –
श्री-विष्णुः ऋषिः, अनुष्टुप् छन्दः, परमात्मा श्री-शङ्करो देवता।

॥ ध्यानम् ॥

मूले कल्प-द्रुमस्य द्रुत-कनक-निभं चारु-पद्मा·सन-स्थं
वामा·ङ्का·रूढ-गौरी-निबिड-कुच-भरा·भोग-गाढो·पगूढम्।
नाना·लङ्कार-कान्तं वर-परशु-मृगा·भीति-हस्तं त्रि-नेत्रं
वन्दे बाले·न्दु-मौलिं गज-वदन-गुहा·श्लिष्ट-पार्श्वं महे·शम्॥

॥ स्तोत्रम् ॥

भवः शिवो हरो रुद्रः पुरुषः पद्म-लोचनः।
अर्थितव्यः सदा·चारः सर्व-शम्भु-महे·श्वरः॥ १ ॥

ईश्वरः स्थाणु·रीशानः सहस्राक्षः सहस्रपात्।
वरीयान् वर-दो वन्द्यः शं-करः पर-मे·श्वरः॥ २ ॥

गङ्गा-धरः शूल-धरः परा·र्थै·क-प्रयोजनः।
सर्व-ज्ञः सर्व-देवा·दि-गिरि-धन्वा जटा-धरः॥ ३ ॥

चन्द्रा·पीड·श्चन्द्र-मौलि·र्विद्वान् विश्वा·मरे·श्वरः।
वेदान्त-सार-सन्दोहः कपाली नील-लोहितः॥४॥

ध्याना·धारोऽपरिच्छेद्यो गौरी-भर्ता गणे·श्वरः।
अष्ट-मूर्ति·र्विश्व-मूर्ति·स्त्रि-वर्गः स्वर्ग-साधनः॥५॥

ज्ञान-गम्यो दृढ-प्रज्ञो देव-देव·स्त्रि-लोचनः।
वामदेवो महा-देवः पाण्डुः परिदृढोऽ-दृढः॥६॥

विश्व-रूपो विरूपा·क्षो वा·गीशः शुचि·रन्तरः।
सर्व-प्रणय-संवादी वृषा·ङ्को वृष-वाहनः॥७॥

ईशः पिनाकी खट्वा·ङ्गी चित्र-वेष·श्चिरन्तनः।
तमो·हरो महा-योगी गोप्ता ब्रह्मा·ङ्ग-हृ·ज्जटी॥८॥

काल-कालः कृत्ति-वासाः सु-भगः प्रणवा·त्मकः।
उन्मत्त-वेष·श्चक्षुष्यो दुर्वासाः स्मर-शासनः॥९॥

दृढा·युधः स्कन्द-गुरुः परमेष्ठी परा·यणः।
अ·नादि-मध्य-निधनो गिरि-शो गिरि-बान्धवः॥१०॥

कुबेर-बन्धुः श्री-कण्ठो लोक-वर्णो·त्तमो·त्तमः।
सामान्य-देवः कोदण्डी नील-कण्ठः परश्वधी॥११॥

विशाला·क्षो मृग-व्याधः सुरे·शः सूर्य-तापनः।
धर्म-कर्मा·क्षमः क्षेत्रं भगवान् भग-नेत्र-भित्॥१२॥

उग्रः पशु-पति·स्तार्क्ष्य-प्रिय-भक्तः प्रियं-वदः।
दान्तो·दया·करो दक्षः कपर्दी काम-शासनः॥१३॥

श्मशान-निलयः सूक्ष्मः श्मशान-स्थो महे·श्वरः।
लोक-कर्ता भूत-पति·र्महा-कर्ता महौ·षधी॥१४॥

उत्तरो गो-पति·र्गोप्ता ज्ञान-गम्यः पुरातनः।
नीतिः सु-नीतिः शुद्धा·त्मा सोम-सोम-रतः सुखी॥१५॥

सोम-पोऽमृत-पः सोमो महा-नीति·र्महा-मतिः।
अजात-शत्रु·रालोकः सम्भाव्यो हव्य-वाहनः॥ १६ ॥

लोक-कारो वेद-कारः सूत्र-कारः सनातनः।
मह·र्षिः कपिला·चार्यो विश्व-दीप्ति·स्त्रि-लोचनः॥ १७॥

पिनाक-पाणि·र्भू·र्देवः स्वस्ति-दः स्वस्ति-कृत् सदा।
त्रि-धामा सौभ-गः शर्व-सर्व-ज्ञः सर्व-गोचरः॥ १८॥

ब्रह्म-धृग्-विश्व-सृक्-स्वर्गः कर्णिकारः प्रियः कविः।
शाखो विशाखो गो-शाखः शिवो नै·कः क्रतुः समः॥ १९॥

गङ्गा-प्लवो·दको भावः सकलः स्थपति-स्थिरः।
विजिता·त्मा विधेया·त्मा भूत-वाहन-सारथिः॥ २०॥

स-गणो गण-कार्य·श्च सुकीर्ति·श्छिन्न-संशयः।
काम-देवः काम-पालो भस्मो·द्धूलित-विग्रहः॥ २१ ॥

भस्म-प्रियो भस्म-शायी कामी कान्तः कृता·गमः।
स-मा·युक्तो निवृत्ता·त्मा धर्म-युक्तः सदा-शिवः॥ २२॥

चतु·र्मुख·श्चतु·र्बाहु·र्दुरावासो दुरासदः।
दुर्गमो दुर्लभो दुर्गः सर्वा·युध-विशारदः॥ २३॥

अध्यात्म-योग-निलयः सुतन्तु·स्तन्तु-वर्धनः।
शुभा·ङ्गो लोक-सारङ्गो जग·दीशोऽमृता·शनः॥ २४॥

भस्म-शुद्धि-करो मेरु·रोजस्वी शुद्ध-विग्रहः।
हिरण्य-रेता·स्तरणि·र्मरीचि·र्महिमा·लयः ॥ २५॥

महा-ह्रदो महा-गर्भः सिद्ध-वृन्दार-वन्दितः।
व्याघ्र-चर्म-धरो व्याली महा-भूतो महा-निधिः॥ २६॥

अमृता·ङ्गोऽमृत-वपुः पञ्च-यज्ञः प्रभञ्जनः।
पञ्च-विंशति-तत्त्व-ज्ञः पारिजातः परा·वरः॥ २७॥

सुलभः सुव्रतः शूरो वाङ्मयै·क-निधि·र्निधिः।
वर्णा·श्रम-गुरु·र्वर्णी शत्रु-जि·च्छत्रु-तापनः॥२८॥

आश्रमः क्षपणः क्षामो ज्ञान-वा·नचला·चलः।
प्रमाण-भूतो दुर्ज्ञेयः सु-पर्णो वायु-वाहनः॥२९॥

धनु·र्धरो धनु·र्वेदो गुण-राशि·र्गुणा·करः।
अनन्त-दृष्टि·रानन्दो दण्डो दमयिता दमः॥३०॥

अभिवाद्यो महा·चार्यो विश्व-कर्मा विशारदः।
वीत-रागो विनीता·त्मा तपस्वी भूत-भावनः॥३१॥

उन्मत्त-वेषः प्रच्छन्नो जित-कामोऽजित-प्रियः।
कल्याण-प्रकृतिः कल्पः सर्व-लोक-प्रजा-पतिः॥३२॥

तपः-स्वी तारको धी-मान् प्रधान-प्रभु·रव्ययः।
लोक-पालोऽन्त·र्हिता·त्मा कल्पा·दिः कमले·क्षणः॥३३॥

वेद-शास्त्रा·र्थ-तत्त्व-ज्ञो नियमो नियमा·श्रयः।
चन्द्रः सूर्यः शनिः केतु·र्वि-रामो विद्रुम-च्छविः॥३४॥

भक्ति-गम्यः पर-ब्रह्म-मृग-बाणा·र्पणोऽनघः।
अद्रि-राजा·लयः का·न्तः परमा·त्मा जगद्-गुरुः॥३५॥

सर्व-कर्मा·चल·स्त्वष्टा मङ्गल्यो मङ्गला·वृतः।
महा-तपा दीर्घ-तपाः स्थविष्ठः स्थविरो ध्रुवः॥३६॥

अहः संवत्सरो व्याप्तिः प्रमाणं पर-मं१ तपः।
संवत्सर-करो मन्त्रः प्रत्ययः सर्व-दर्शनः॥३७॥

अजः सर्वे·श्वरः स्निग्धो महा-रेता महा-बलः।
योगी योग्यो महा-रेताः सिद्धः सर्वा·दि·रग्नि-दः॥३८॥

वसु·र्वसु-मनाः सत्य-सर्व-पाप-हरो ह-रः।
अमृतः शाश्वतः शान्तो बाण-हस्तः प्रताप-वान्॥३९॥

कमण्डलु-धरो धन्वी वेदा·ङ्गो वेद-वि·न्मुनिः।
भ्राजिष्णु·र्भोजनं भोक्ता लोक-नेता दुराधरः॥४०॥

अती·न्द्रियो महा-मायः सर्वा·वास·श्चतु·ष्पथः।
काल-योगी महा-नादो महो·त्साहो महा-बलः॥४१॥

महा-बुद्धि·र्महा-वीर्यो भूत-चारी पुरं·दरः।
निशा-चरः प्रेत-चारि-महा-शक्ति·र्महा-द्युतिः॥४२॥

अनिर्देश्य-वपुः श्री-मान् सर्व-हा·र्यमितो गतिः।
बहु-श्रुतो बहु-मयोऽ नियता·त्मा भवो·द्भवः॥४३॥

ओज·स्तेजो·द्युति-करो नर्तकः सर्व-कामकः।
नृत्य-प्रियो नृत्य-नृत्यः प्रकाशा·त्मा प्रतापनः॥४४॥

बुद्ध-स्पष्टा·क्षरो मन्त्रः स·न्मानः सार-सम्प्लवः।
युगा·दि-कृद् युगा·वर्तो गम्भीरो वृष-वाहनः॥४५॥

इष्टो विशिष्टः शिष्टे·ष्टः शरभः शर-भो धनुः।
अपां निधि·रधिष्ठान-विजयो जय-काल-वित्॥४६॥

प्रतिष्ठितः प्रमाण-ज्ञो हिरण्य-कवचो हरिः।
विरोचनः सुर-गणो विद्ये·शो विबुधा·श्रयः॥४७॥

बाल-रूपो बलो·न्माथी विवर्तो गहनो गुरुः।
करणं कारणं कर्ता सर्व-बन्ध-विमोचनः॥४८॥

विद्वत्-तमो वीत-भयो विश्व-भर्ता निशा-करः।
व्यवसायो व्यवस्थानः स्थान-दो जग·दादि-जः॥४९॥

दुन्दुभो ललितो विश्वो भवा·त्मा·त्मनि संस्थितः।
वीरे·श्वरो वीरभद्रो वीर-हा वीर-भृद्-विराट्॥५०॥

वीर-चूडा-मणि·र्वेत्ता तीव्र-नादो नदी-धरः।
आज्ञा-धार·स्त्रिशूली च शिपि-विष्टः शिवा·लयः॥५१॥

वालखिल्यो महा-चाप·स्तिग्मांशु·र्निधि·रव्ययः।
अभिरामः सु-शरणः सुब्रह्मण्यः सुधा-पतिः॥५२॥

मघवान् कौशिको गो-मान् वि-श्रामः सर्व-शासनः।
ललाटा·क्षो विश्व-देहः सारः संसार-चक्र-भृत्॥५३॥

अमोघ-दण्डी मध्य-स्थो हिरण्यो ब्रह्म-वर्चसी।
परमा·र्थः पर-मयः३ शम्बरो व्याघ्र-कोऽनलः॥५४॥

रुचि·र्वर-रुचि·र्वन्द्यो वाच·स्पति·रह·र्पतिः।
रवि·र्विरोचनः स्कन्धः शास्ता वैवस्वतोऽजनः॥५५॥

युक्ति·रुन्नत-कीर्ति·श्च शान्त-रागः परा-जयः।
कैलास-पति-कामा·रिः सविता रवि-लोचनः॥५६॥

विद्वत्-तमो वीत-भयो विश्व-हर्ताऽनिवारितः।
नित्यो नियत-कल्याणः पुण्य-श्रवण-कीर्तनः॥५७॥

दूर-श्रवा विश्व-सहो ध्येयो दुःस्वप्न-नाशनः।
उत्तारको दुष्कृति-हा दुर्धर्षो दुःसहोऽभयः॥५८॥

अनादि·र्भू·र्भुवो लक्ष्मीः किरीटि-त्रिदशा·धिपः।
विश्व-गोप्ता विश्व-भर्ता सुधीरो रुचिरा·ङ्गदः॥५९॥

जननो जन-जन्मा·दिः प्रीति-मान् नीति-मान् नयः।
विशिष्टः काश्यपो भानु·र्भीमो भीम-पराक्रमः॥६०॥

प्रणवः सप्तधा-चारो महा-कायो महा-धनुः।
जन्मा·धिपो महा-देवः सकला·गम-पार-गः॥६१॥

तत्त्वा·तत्त्व-विवेका·त्मा विभूष्णु·र्भूति-भूषणः।
ऋषि·र्ब्राह्मण-वि·ज्जिष्णु·र्जन्म-मृत्यु-जरा·तिगः॥६२॥

यज्ञो यज्ञ-पति·र्यज्वा यज्ञा·न्तोऽमोघ-विक्रमः।
महे·न्द्रो दुर्भरः सेनी यज्ञा·ङ्गो यज्ञ-वाहनः॥६३॥

पञ्च-ब्रह्म-समुत्पत्ति·र्विश्वे·शो विमलो·दयः।
आत्म-योनि·र·ना·द्यन्तः षड्विंशत्-सप्त-लोक-धृक्॥ ६४॥

गायत्री-वल्लभः प्रांशु·र्विश्वा·वासः प्रभा-करः।
शिशु·र्गिरि-रतः सम्राट्-सुषेणः सुर-शत्रु-हा॥ ६५॥

अ-मोघोऽरिष्ट-मथनो मुकुन्दो विगत-ज्वरः।
स्वयं-ज्योति·रनु-ज्योति·रात्म-ज्योति·रचञ्चलः॥ ६६॥

पिङ्गलः कपिल-श्मश्रुः शास्त्र-नेत्र-त्रयी-तनुः।
ज्ञान-स्कन्धो महा-ज्ञानी निरुत्पत्ति·रुपप्लवः॥ ६७॥

भगो विवस्वा·नादित्यो योगा·चार्यो बृहस्पतिः।
उदार-कीर्ति·रुद्योगी सद्-योगी स·दस·न्मयः॥ ६८॥

नक्षत्र-माली राके·शः सा·धिष्ठानः ष·डाश्रयः।
पवित्र-पाणिः पापा·रि·र्मणि-पूरो मनो·गतिः॥ ६९॥

हृत्-पुण्डरीक·मासीनः शुक्लः शान्तो वृषा-कपिः।
विष्णु·र्ग्रह-पतिः कृष्णः समर्थोऽर्थन-नाशनः॥ ७०॥

अधर्म-शत्रु·रक्षय्यः पुरु-हूतः पुरु-ष्टुतः।
ब्रह्म-गर्भो बृहद्-गर्भो धर्म-धेनु·र्धना·गमः॥ ७१॥

जग·द्धितै·षि-सुगतः कुमारः कुशला·गमः।
हिरण्य-वर्णो ज्योतिष्मान् नाना-भूत-धरो ध्वनिः॥ ७२॥

अरोगो नियमा·ध्यक्षो विश्वामित्रो द्विजो·त्तमः।
बृह·ज्ज्योतिः सुधामा च महा-ज्योति·रनुत्तमः॥ ७३॥

मातामहो मातरिश्वा नभस्वान् नाग-हार-धृक्।
पुलस्त्यः पुलहोऽगस्त्यो जातूकर्ण्यः पराशरः॥ ७४॥

निरावरण-धर्म-ज्ञो विरिञ्चो विष्टर-श्रवाः।
आत्म-भू·रनिरुद्धोऽत्रि-ज्ञान-मूर्ति·र्महा-यशाः॥ ७५॥

लोक-चूडामणि·र्वीर·श्चण्ड-सत्य-पराक्रमः ।
व्याल-कल्पो महा-कल्पो महा-वृक्षः कला-धरः ॥ ७६ ॥

अलं-करिष्णु··स्त्वचलो रोचिष्णु·र्विक्रमो·त्तमः ।
आशु-शब्द-पति·र्वेगी प्लवनः शिखि-सारथिः ॥ ७७ ॥

असंसृष्टोऽतिथिः शक्रः प्रमाथी पाप-नाशनः ।
वसु-श्रवाः कव्य-वाहः प्रतप्तो विश्व-भोजनः ॥ ७८ ॥

जर्यो जरा·धि-शमनो लोहित·श्च तनूनपात् ।
पृष·दश्वो नभो योनिः सुप्रतीक·स्तमिस्र-हा ॥ ७९ ॥

निदाघ·स्तपनो मेघः पक्षः पर-पुरं-जयः ।
मुखा·निलः सुनिष्पन्नः सुरभिः शिशिरा·त्मकः ॥ ८० ॥

वसन्तो माधवो ग्रीष्मो नभस्यो बीज-वाहनः ।
अङ्गिरा मुनि·रात्रेयो वि-मलो विश्व-वाहनः ॥ ८१ ॥

पावनः पुरुजि·च्छक्र·स्त्रि-विद्यो नर-वाहनः ।
मनो-बुद्धि·रहङ्कारः क्षेत्र-ज्ञः क्षेत्र-पालकः ॥ ८२ ॥

तेजो·निधि·र्ज्ञान-निधि·र्विपाको विघ्न-कारकः ।
अ-धरोऽनुत्तरो ज्ञेयो ज्येष्ठो निःश्रेयसा·लयः ॥ ८३ ॥

शैलो नग·स्तनु·र्दोहो दानवा·रि·ररिं-दमः ।
चारु-धी·र्जनक·श्चारु-विशल्यो लोक-शल्य-कृत् ॥ ८४ ॥

चतु·र्वेद·श्चतु·र्भाव·श्चतुर·श्चतुर-प्रियः ।
आम्नायोऽथ समा·म्नाय·स्तीर्थ-देव-शिवा·लयः ॥ ८५ ॥

बहु-रूपो महा-रूपः सर्व-रूप·श्चरा·चरः ।
न्याय-निर्वाहको न्यायो न्याय-गम्यो नि·रञ्जनः ॥ ८६ ॥

सहस्र-मूर्धा देवे·न्द्रः सर्व-शस्त्र-प्रभञ्जनः ।
मुण्डो वि-रूपो वि-कृतो दण्डी दान्तो गुणो·त्तमः ॥ ८७ ॥

पिङ्गला·क्षोऽथ ह·र्यक्षो नील-ग्रीवो नि·रामयः।
सहस्त्र-बाहुः सर्वे·शः शरण्यः सर्व-लोक-भृत्॥८८॥

पद्मा·सनः परं-ज्योतिः परा·वर-परं-फलः।
पद्म-गर्भो महा-गर्भो विश्व-गर्भो विचक्षणः॥८९॥

परा·वर-ज्ञो बीजे·शः सु-मुखः सु-महा-स्वनः।
देवा·सुर-गुरु·र्देवो देवा·सुर-नमस्कृतः॥९०॥

देवा·सुर-महा-मात्रो देवा·सुर-महा·श्रयः।
देवा·दि-देवो देव·र्षि-देवा·सुर-वर-प्रदः॥९१॥

देवा·सुरे·श्वरो दिव्यो देवा·सुर-महे·श्वरः।
सर्व-देव-मयोऽचिन्त्यो देवता·त्माऽऽत्म-सम्भवः॥९२॥

ईड्योऽनीशः सुर-व्याघ्रो देव-सिंहो दिवा-करः।
विबुधा·ग्र-वर-श्रेष्ठः सर्व-देवो·त्तमो·त्तमः॥९३॥

शिव-ज्ञान-रतः श्री-मान् शिखि-श्री-पर्वत-प्रियः।
जय-स्तम्भो विशिष्ट·म्भो नरसिंह-निपातनः॥९४॥

ब्रह्म-चारी लोक-चारी धर्म-चारी धना·धिपः।
नन्दी नन्दी·श्वरो नग्नो नग्न-व्रत-धरः शुचिः॥९५॥

लिङ्गा·ध्यक्षः सुरा·ध्यक्षो युगा·ध्यक्षो युगा·वहः।
स्व-वशः स-वशः स्वर्ग-स्वरः स्वर-मय-स्वनः॥९६॥

बीजा·ध्यक्षो बीज-कर्ता धन-कृद्-धर्म-वर्धनः।
दम्भोऽदम्भो महा-दम्भः सर्व-भूत-महे·श्वरः॥९७॥

श्मशान-निलय·स्तिष्यः सेतु·रप्रतिमा·कृतिः।
लोको·त्तर-स्फुटा·लोक·स्त्र्यम्बको नाग-भूषणः॥९८॥

अन्धका·रि·र्मख-द्वेषी विष्णु-कन्धर-पातनः।
वीत-दोषोऽक्षय-गुणो दक्षा·रिः पूष-दन्त-हृत्॥९९॥

धू·र्जटिः खण्ड-परशुः स-कलो निष्कलोऽनघः।
आ-धारः सकला·धारः पाण्डुरा·भो मृडो नटः॥ १०० ॥

पूर्णः पूरयिता पुण्यः सु-कुमारः सु-लोचनः।
साम-गेयः प्रिय-करः पुण्य-कीर्ति·र-नाम-यः॥ १०१ ॥

मनो·जव·स्तीर्थ-करो जटिलो जीविते·श्वरः।
जीविता·न्त-करो नि-त्यो वसु-रेता वसु-प्रियः॥ १०२ ॥

सद्-गतिः सत्-कृतिः सक्तः काल-कण्ठः कला-धरः।
मानी मान्यो महा-कालः सद्-भूतिः सत्-परा·यणः॥ १०३ ॥

चन्द्र-सञ्जीवनः शास्ता लोक-गूढोऽमरा·धिपः।
लोक-बन्धु·र्लोक-नाथः कृत-ज्ञः कृति-भूषणः॥ १०४ ॥

अ·नपा·य्यक्षरः का·न्तः सर्व-शास्त्र-भृतां वरः।
तेजो·मयो द्युति-धरो लोक-मायोऽग्र-णी·रणुः॥ १०५ ॥

शुचि-स्मितः प्रसन्ना·त्मा दुर्जयो दुरतिक्रमः।
ज्योति·र्मयो निराकारो जग·न्नाथो जले·श्वरः॥ १०६ ॥

तुम्ब-वीणी महा-कायो वि-शोकः शोक-नाशनः।
त्रि-लोका·त्मा त्रि-लोके·शः शुद्धः शुद्धी रथा·क्ष-जः॥ १०७ ॥

अव्यक्त-लक्षणोऽ-व्यक्तो व्यक्ता·व्यक्तो विशां पतिः।
वर-शीलो वर-तुलो मानो मान-धनो मयः४॥ १०८ ॥

ब्रह्मा विष्णुः प्रजा-पालो हंसो हंस-गति·र्यमः।
वेधा धाता विधाता च अत्ता हर्ता चतु·र्मुखः॥ १०९ ॥

कैलास-शिखरा·वासी सर्वा·वासी सतां गतिः।
हिरण्य-गर्भो हरिणः पुरुषः पूर्व-जः पिता॥ ११० ॥

भूता·लयो भूत-पति·र्भूति-दो भुवने·श्वरः।
संयोगी योग-विद्-ब्रह्मा ब्रह्मण्यो ब्राह्मण-प्रियः॥ १११ ॥

देव-प्रियो देव-नाथो देव-ज्ञो देव-चिन्तकः।
विषमा·क्षः कला·ध्यक्षो वृषा·ङ्को वृष-वर्धनः॥ ११२॥

नि·र्मदो नि·रहङ्कारो नि·र्मोहो नि·रुपद्रवः।
दर्प-हा दर्पितो दृप्तः सर्व·र्तु-परिवर्तकः॥ ११३॥

सप्त-जिह्वः सहस्रा·र्चिः स्निग्धः प्रकृति-दक्षिणः।
भूत-भव्य-भव·न्नाथः प्रभवो भ्रान्ति-नाशनः॥ ११४॥

अर्थोऽनर्थो महा-कोशः पर-कार्यै·क-पण्डितः।
नि·ष्कण्टकः कृता·नन्दो नि·र्व्याजो व्याज-मर्दनः॥ ११५॥

सत्त्ववान् सात्त्विकः सत्य-कीर्ति-स्तम्भ-कृता·गमः।
अकम्पितो गुण-ग्राही नै·का·त्मा नै·क-कर्म-कृत्॥ ११६॥

सु-प्रीतः सु-मुखः सूक्ष्मः सु-करो दक्षिणोऽनलः।
स्कन्धः स्कन्ध-धरो धुर्यः प्रकटः प्रीति-वर्धनः॥ ११७॥

अपराजितः सर्व-सहो विदग्धः सर्व-वाहनः।
अधृतः स्व-धृतः साध्यः पूर्त-मूर्ति·र्यशो·धरः॥ ११८॥

वराह-श्रृङ्ग-धृग् वायु·र्बलवा·नेक-नायकः।
श्रुति-प्रकाशः श्रुति-मा·नेक-बन्धु·रनेक-धृक्॥ ११९॥

श्री-वल्लभ-शिवा·रम्भः शान्त-भद्रः समञ्जसः।
भू-शयो भूति-कृद्-भूति·र्भूषणो भूत-वाहनः॥ १२०॥

अकायो भक्त-काय-स्थः काल-ज्ञानी कला-वपुः।
सत्य-व्रत-महा-त्यागी निष्ठा-शान्ति-परा·यणः॥ १२१॥

परा·र्थ-वृत्ति·र्वर-दो विविक्तः श्रुति-सागरः।
अनिर्विण्णो गुण-ग्राही कलङ्का·ङ्कः कलङ्क-हा॥ १२२॥

स्वभाव-रुद्-द्रो मध्य-स्थः शत्रु-घ्नो मध्य-नाशकः।
शिखण्डी कवची शूली चण्डी मुण्डी च कुण्डली॥ १२३॥

मेखली कवची खड्गी मायी संसार-सारथिः ।
अमृत्युः सर्व-दृक् सिंह·स्तेजो-राशि·र्महा-मणिः ॥ १२४ ॥

अ-सङ्ख्येयोऽप्रमेया·त्मा वीर्यवान् कार्य-कोविदः ।
वेद्यो वेदा·र्थ-विद्-गोप्ता सर्वा·चारो मुनी·श्वरः ॥ १२५ ॥

अ-नुत्-तमो दुराधर्षो मधुरः प्रिय-दर्शनः ।
सुरे·शः शरणं सर्वः शब्द-ब्रह्म-सतां गतिः ॥ १२६ ॥

काल-भक्षः कलङ्का·रिः कङ्कणी-कृत-वासुकिः ।
महे·ष्वासो मही-भर्ता नि·ष्कलङ्को वि-शृङ्खलः ॥ १२७ ॥

द्यु-मणि·स्तरणि·र्धन्यः सिद्धि-दः सिद्धि-साधनः ।
निवृत्तः संवृतः शिल्पो व्यूढो·रस्को महा-भुजः ॥ १२८ ॥

एक-ज्योति·र्निरातङ्को नरो नारायण-प्रियः ।
नि·र्लेपो नि·ष्प्रपञ्चा·त्मा नि·र्व्यग्रो व्यग्र-नाशनः ॥ १२९ ॥

स्तव्य-स्तव-प्रियः स्तोता व्यास-मूर्ति·रनाकुलः ।
निरवद्य-पदो·पायो विद्या-राशि·रविक्रमः ॥ १३० ॥

प्रशान्त-बुद्धि·रक्षुद्रः क्षुद्र-हा नित्य-सुन्दरः ।
धैर्या·ग्र्य-धुर्यो धात्री·शः शाकल्यः शर्वरी-पतिः ॥ १३१ ॥

परमा·र्थ-गुरु·र्दृष्टि·र्गुरु·राश्रित-वत्सलः ।
रसो रस-ज्ञः सर्व-ज्ञः सर्व-सत्त्वा·वलम्बनः ॥ १३२ ॥

॥ इति श्री-लिङ्ग-महा-पुराणे पूर्व-भागे अष्टनवतितमे अध्याये
भगवता विष्णुना प्रोक्तं श्री-शिव-सहस्र-नाम-स्तोत्रम् ॥

# श्री-शिव-सहस्र-नामावलिः

भवाय शिवाय
हराय रुद्राय
पुरुषाय
पद्म-लोचनाय

अर्थितव्याय
सदा·चाराय
सर्व-शम्भु-महे·श्वराय
ईश्वराय
स्थाणवे
ईशानाय (१०)
सहस्रा·क्षाय सहस्र-पदे
वरीयसे
वर-दाय वन्द्याय
शं-कराय
पर-मे·श्वराय
गङ्गा-धराय
शूल-धराय
परा·र्थै·क-प्रयोजनाय
सर्व-ज्ञाय
सर्व-देवा·दि-गिरि-धन्वने (२०)
जटा-धराय
चन्द्रा·पीडाय
चन्द्र-मौलये
विदुषे
विश्वा·मरे·श्वराय
वेदान्त-सार-सन्दोहाय
कपालिने नील-लोहिताय
ध्याना·धाराय
अपरिच्छेद्याय
गौरी-भर्त्रे (३०)
गणे·श्वराय
अष्ट-मूर्तये विश्व-मूर्तये
त्रि-वर्गाय
स्वर्ग-साधनाय
ज्ञान-गम्याय
दृढ-प्रज्ञाय
देव-देवाय
त्रि-लोचनाय
वामदेवाय
महा-देवाय (४०)
पाण्डवे
परिदृढाय
अ-दृढाय
विश्व-रूपाय
विरूपा·क्षाय
वा·गीशाय
शुचये
अन्तराय
सर्व-प्रणय-संवादिने
वृषा·ङ्काय (५०)
वृष-वाहनाय
ईशाय पिनाकिने
खट्वा·ङ्गिने
चित्र-वेषाय
चिरंतनाय
तमो·हराय
महा-योगिने गोप्त्रे
ब्रह्मा·ङ्ग-हृते जटिने
काल-कालाय
कृत्ति-वाससे (६०)
सु-भगाय
प्रणवा·त्मकाय

उन्मत्त-वेषाय
चक्षुष्याय
दुर्वाससे
स्मर-शासनाय
दृढा·युधाय स्कन्द-गुरवे
परमेष्ठिने परा·यणाय
अ·नादि-मध्य-निधनाय
गिरि-शाय गिरि-बान्धवाय (७०)
कुबेर-बन्धवे श्री-कण्ठाय
लोक-वर्णो·त्तमो·त्तमाय
सामान्य-देवाय
कोदण्डिने
नील-कण्ठाय
परश्वधिने
विशाला·क्षाय
मृग-व्याधाय
सुरे·शाय
सूर्य-तापनाय (८०)
धर्म-कर्मा·क्षमाय
क्षेत्राय भगवते
भग-नेत्र-भिदे उग्राय
पशु-पतये
तार्क्ष्य-प्रिय-भक्ताय
प्रियं-वदाय
दान्तो·दया·कराय
दक्षाय
कपर्दिने
काम-शासनाय (९०)

श्मशान-निलयाय सूक्ष्माय
श्मशान-स्थाय
महे·श्वराय
लोक-कर्त्रे
भूत-पतये
महा-कर्त्रे
महौ·षधिने
उत्तराय
गो-पतये
गोप्त्रे (१००)
ज्ञान-गम्याय
पुरातनाय
नीतये
सु-नीतये
शुद्धा·त्मने
सोम-सोम-रताय
सुखिने
सोम-पाय
अमृत-पाय
सोमाय (११०)
महा-नीतये
महा-मतये
अजात-शत्रवे
आलोकाय
सम्भाव्याय
हव्य-वाहनाय
लोक-काराय
वेद-काराय
सूत्र-काराय

सनातनाय (१२०)
मह·र्षये कपिला·चार्याय
विश्व-दीप्तये
त्रि-लोचनाय
पिनाक-पाणये भू·र्देवाय
स्वस्ति-दाय
सदा स्वस्ति-कृते
त्रि-धाम्ने
सौभ-गाय
शर्व-सर्व-ज्ञाय
सर्व-गोचराय (१३०)
ब्रह्म-धृग्-विश्व-सृक्-स्वर्गाय
कर्णिकाराय
प्रियाय
कवये
शाखाय विशाखाय
गो-शाखाय
शिवाय
नै·काय
क्रतवे
समाय (१४०)
गङ्गा-प्लवो·दकाय
भावाय
सकलाय
स्थपति-स्थिराय
विजिता·त्मने
विधेया·त्मने
भूत-वाहन-सारथये
स-गणाय
गण-कार्याय
सुकीर्तये (१५०)
छिन्न-संशयाय
काम-देवाय
काम-पालाय
भस्मो·द्धूलित-विग्रहाय
भस्म-प्रियाय
भस्म-शायिने
कामिने कान्ताय
कृता·गमाय
स-मा·युक्ताय
निवृत्ता·त्मने (१६०)
धर्म-युक्ताय
सदा-शिवाय
चतु·र्मुखाय चतु·र्बाहवे
दुरावासाय
दुरासदाय
दुर्गमाय दुर्लभाय
दुर्गाय
सर्वा·युध-विशारदाय
अध्यात्म-योग-निलयाय
सुतन्तवे (१७०)
तन्तु-वर्धनाय
शुभा·ङ्गाय
लोक-सारङ्गाय
जग·दीशाय
अमृता·शनाय
भस्म-शुद्धि-कराय

मेरवे
ओजस्विने शुद्ध-विग्रहाय
हिरण्य-रेतसे
तरणये मरीचये (१८०)
महिमा·लयाय
महा-हृदाय
महा-गर्भाय
सिद्ध-वृन्दार-वन्दिताय
व्याघ्र-चर्म-धराय
व्यालिने
महा-भूताय
महा-निधये
अमृता·ङ्गाय
अमृत-वपुषे (१९०)
पञ्च-यज्ञाय
प्रभञ्जनाय
पञ्च-विंशति-तत्त्व-ज्ञाय
पारिजाताय
परा·वराय
सुलभाय
सुव्रताय शूराय
वाङ्मयै·क-निधये
निधये
वर्णा·श्रम-गुरवे (२००)
वर्णिने
शत्रु-जिते शत्रु-तापनाय
आश्रमाय
क्षपणाय
क्षामाय
ज्ञान-वते
अचला·चलाय
प्रमाण-भूताय
दुर्ज्ञेयाय
सु-पर्णाय (२१०)
वायु-वाहनाय
धनु·र्धराय धनु·र्वेदाय
गुण-राशये
गुणा·कराय
अनन्त-दृष्टये
आनन्दाय
दण्डाय दमयित्रे
दमाय
अभिवाद्याय
महा·चार्याय (२२०)
विश्व-कर्मणे
विशारदाय
वीत-रागाय
विनीता·त्मने
तपस्विने
भूत-भावनाय
उन्मत्त-वेषाय प्रच्छन्नाय
जित-कामाय
अजित-प्रियाय
कल्याण-प्रकृतये (२३०)
कल्पाय
सर्व-लोक-प्रजा-पतये
तपः-स्विने तारकाय
धी-मते

प्रधान-प्रभवे
अव्ययाय
लोक-पालाय
अन्त·र्हिता·त्मने
कल्पा·दये
कमले·क्षणाय (२४०)
वेद-शास्त्रा·र्थ-तत्त्व-ज्ञाय
नियमाय
नियमा·श्रयाय
चन्द्राय
सूर्याय
शनये
केतवे
वि-रामाय
विद्रुम-च्छवये
भक्ति-गम्याय (२५०)
पर-ब्रह्म-मृग-बाणा·र्पणाय
अनघाय
अद्रि-राजा·लयाय
का·न्ताय
परमा·त्मने
जगद्-गुरवे
सर्व-कर्मा·चलाय
त्वष्ट्रे
मङ्गल्याय मङ्गला·वृताय
महा-तपसे (२६०)
दीर्घ-तपसे
स्थविष्ठाय
स्थविराय

ध्रुवाय
अह्ने
संवत्सराय
व्याप्तये
प्रमाणाय
पर-माय
तपसे (२७०)
संवत्सर-कराय
मन्त्राय प्रत्ययाय
सर्व-दर्शनाय
अजाय
सर्वे·श्वराय
स्निग्धाय
महा-रेतसे महा-बलाय
योगिने
योग्याय
महा-रेतसे (२८०)
सिद्धाय
सर्वा·दये
अग्नि-दाय
वसवे
वसु-मनसे
सत्य-सर्व-पाप-हराय
ह-राय
अमृताय शाश्वताय
शान्ताय
बाण-हस्ताय प्रताप-वते (२९०)
कमण्डलु-धराय
धन्विने

वेदा·ज्ञाय
वेद-विदे
मुनये
भ्राजिष्णवे
भोजनाय भोक्ते
लोक-नेत्रे
दुराधराय
अती·न्द्रियाय (३००)
महा-मायाय
सर्वा·वासाय
चतु·ष्पथाय
काल-योगिने
महा-नादाय
महो·त्साहाय
महा-बलाय
महा-बुद्धये
महा-वीर्याय
भूत-चारिणे (३१०)
पुरं·दराय
निशा-चराय
प्रेत-चारि-महा-शक्तये
महा-द्युतये
अनिर्देश्य-वपुषे
श्री-मते
सर्व-हा·र्यमिताय
गतये
बहु-श्रुताय
बहु-मयाय (३२०)
नियता·त्मने

भवो·द्भवाय
ओज·स्तेजो·द्युति-कराय
नर्तकाय
सर्व-कामकाय
नृत्य-प्रियाय
नृत्य-नृत्याय
प्रकाशा·त्मने प्रतापनाय
बुद्ध-स्पष्टा·क्षराय
मन्त्राय (३३०)
स·न्मानाय
सार-सम्प्लवाय
युगा·दि-कृते युगा·वर्ताय
गम्भीराय
वृष-वाहनाय
इष्टाय
विशिष्टाय शिष्टे·ष्टाय
शरभाय
शर-भाय धनुषे
अपां निधये (३४०)
अधिष्ठान-विजयाय
जय-काल-विदे
प्रतिष्ठिताय
प्रमाण-ज्ञाय
हिरण्य-कवचाय
हरये
विरोचनाय
सुर-गणाय
विद्ये·शाय विबुधा·श्रयाय
बाल-रूपाय (३५०)

बलो·न्माथिने
विवर्ताय
गहनाय गुरवे
करणाय
कारणाय
कर्त्रे
सर्व-बन्ध-विमोचनाय
विद्वत्-तमाय वीत-भयाय
विश्व-भर्त्रे
निशा-कराय (३६०)
व्यवसायाय
व्यवस्थानाय
स्थान-दाय
जग·दादि-जाय
दुन्दुभाय
ललिताय
विश्वाय
भवा·त्मा·त्मनि संस्थिताय
वीरे·श्वराय वीरभद्राय
वीर-घ्ने (३७०)
वीर-भृद्-विराजे
वीर-चूडा-मणये
वेत्त्रे
तीव्र-नादाय
नदी-धराय
आज्ञा-धाराय
त्रिशूलिने
शिपि-विष्टाय
शिवा·लयाय

वालखिल्याय (३८०)
महा-चापाय
तिग्मां·शवे
निधये अव्ययाय
अभिरामाय
सु-शरणाय
सुब्रह्मण्याय
सुधा-पतये
मघवते कौशिकाय
गो-मते
वि-श्रामाय (३९०)
सर्व-शासनाय
ललाटा·क्षाय
विश्व-देहाय
साराय
संसार-चक्र-भृते
अमोघ-दण्डिने
मध्य-स्थाय
हिरण्याय
ब्रह्म-वर्चसिने
परमा·र्थाय (४००)
पर-मयाय
शम्बराय
व्याघ्र-काय
अनलाय
रुचये
वर-रुचये
वन्द्याय
वाच·स्पतये

अह·र्पतये
रवये विरोचनाय (४१०)
स्कन्धाय
शास्त्रे वैवस्वताय
अजनाय
युक्तये
उन्नत-कीर्तये
शान्त-रागाय
परा-जयाय
कैलास-पति-कामा·रये
सवित्रे
रवि-लोचनाय (४२०)
विद्वत्-तमाय
वीत-भयाय
विश्व-हर्त्रे अनिवारिताय
नित्याय
नियत-कल्याणाय
पुण्य-श्रवण-कीर्तनाय
दूर-श्रवसे
विश्व-सहाय
ध्येयाय
दुःस्वप्न-नाशनाय (४३०)
उत्तारकाय
दुष्कृति-घ्ने
दुर्धर्षाय
दुःसहाय
अभयाय
अनादये
भुवे
भुवो लक्ष्म्यै
किरीटि-त्रिदशा·धिपाय
विश्व-गोप्त्रे (४४०)
विश्व-भर्त्रे
सुधीराय
रुचिरा·ङ्गदाय
जननाय
जन-जन्मा·दये
प्रीति-मते
नीति-मते
नयाय
विशिष्टाय
काश्यपाय (४५०)
भानवे
भीमाय
भीम-पराक्रमाय
प्रणवाय
सप्तधा-चाराय
महा-कायाय महा-धनुषे
जन्मा·धिपाय
महा-देवाय
सकला·गम-पार-गाय
तत्त्वा·तत्त्व-विवेका·त्मने (४६०)
विभूष्णवे
भूति-भूषणाय
ऋषये
ब्राह्मण-वि·ज्जिष्णवे
जन्म-मृत्यु-जरा·तिगाय
यज्ञाय यज्ञ-पतये

यज्वने
यज्ञा·न्ताय
अमोघ-विक्रमाय
महे·न्द्राय (४७०)
दुर्भराय
सेनिने
यज्ञा·ङ्गाय यज्ञ-वाहनाय
पञ्च-ब्रह्म-समुत्पत्तये
विश्वे·शाय
विमलो·दयाय
आत्म-योनये
अ·ना·द्यन्ताय
षड्विंशत्-सप्त-लोक-धृषे
गायत्री-वल्लभाय (४८०)
प्रांशवे
विश्वा·वासाय
प्रभा-कराय
शिशवे
गिरि-रताय
सम्राट्-सुषेणाय
सुर-शत्रु-घ्ने
अ-मोघाय
अरिष्ट-मथनाय
मुकुन्दाय (४९०)
विगत-ज्वराय
स्वयं-ज्योतिषे
अनु-ज्योतिषे
आत्म-ज्योतिषे
अचञ्चलाय
पिङ्गलाय
कपिल-श्मश्रवे
शास्त्र-नेत्र-त्रयी-तनवे
ज्ञान-स्कन्धाय
महा-ज्ञानिने (५००)
निरुत्पत्तये
उपप्लवाय
भगाय
विवस्वते आदित्याय
योगा·चार्याय
बृहस्पतये
उदार-कीर्तये
उद्योगिने
सद्-योगिने
स·दस·न्मयाय (५१०)
नक्षत्र-मालिने राके·शाय
सा·धिष्ठानाय
ष·डाश्रयाय
पवित्र-पाणये
पापा·रये
मणि-पूराय
मनो·गतये
हृत्-पुण्डरीक-मासीनाय
शुक्लाय
शान्ताय वृषा-कपये (५२०)
विष्णवे
ग्रह-पतये
कृष्णाय
समर्थाय

अर्थन्-नाशनाय
अधर्म-शत्रवे
अक्षय्याय
पुरु-हूताय पुरु-ष्टुताय
ब्रह्म-गर्भाय
बृहद्-गर्भाय (५३०)
धर्म-धेनवे
धना·गमाय
जग·द्धितै·षि-सुगताय
कुमाराय
कुशला·गमाय
हिरण्य-वर्णाय
ज्योतिष्मते
नाना-भूत-धराय
ध्वनये
अरोगाय (५४०)
नियमा·ध्यक्षाय
विश्वामित्राय द्विजो·त्तमाय
बृह·ज्ज्योतिषे
सुधाम्ने
महा-ज्योतिषे
अनुत्तमाय
मातामहाय
मातरिश्वने
नभस्वते
नाग-हार-धृषे (५५०)
पुलस्त्याय
पुलहाय
अगस्त्याय
जातूकर्ण्याय
पराशराय
निरावरण-धर्म-ज्ञाय
विरिञ्चाय
विष्टर-श्रवसे
आत्म-भुवे
अनिरुद्धाय (५६०)
अत्रि-ज्ञान-मूर्तये
महा-यशसे
लोक-चूडामणये
वीराय
चण्ड-सत्य-पराक्रमाय
व्याल-कल्पाय
महा-कल्पाय
महा-वृक्षाय
कला-धराय
अलं-करिष्णवे (५७०)
अचलाय
रोचिष्णवे
विक्रमो·त्तमाय
आशु-शब्द-पतये
वेगिने
प्लवनाय
शिखि-सारथये
असंसृष्टाय
अतिथये
शक्राय प्रमाथिने (५८०)
पाप-नाशनाय
वसु-श्रवसे

कव्य-वाहाय
प्रतप्ताय
विश्व-भोजनाय
जर्याय
जरा·धि-शमनाय
लोहिताय
तनूनपाते
पृष·दश्वाय (५९०)
नभसे
योनये
सुप्रतीकाय
तमिस्र-घ्ने
निदाघाय तपनाय
मेघाय पक्षाय
पर-पुरं-जयाय
मुखा·निलाय
सुनिष्पन्नाय
सुरभये (६००)
शिशिरा·त्मकाय
वसन्ताय माधवाय
ग्रीष्माय
नभस्याय
बीज-वाहनाय
अङ्गिरसे
मुनये आत्रेयाय
वि-मलाय
विश्व-वाहनाय
पावनाय (६१०)
पुरुजिते
शक्राय
त्रि-विद्याय
नर-वाहनाय
मनो-बुद्धये
अहङ्काराय
क्षेत्र-ज्ञाय
क्षेत्र-पालकाय
तेजो·निधये
ज्ञान-निधये (६२०)
विपाकाय
विघ्न-कारकाय
अ-धराय
अनुत्तराय
ज्ञेयाय
ज्येष्ठाय
निःश्रेयसा·लयाय
शैलाय
नगाय
तनवे (६३०)
दोहाय
दानवा·रये
अरिं-दमाय
चारु-धिये जनकाय
चारु-विशल्याय
लोक-शल्य-कृते
चतु·र्वेदाय
चतु·र्भावाय
चतुराय चतुर-प्रियाय
आम्नायाय (६४०)

समा·म्नायाय
तीर्थ-देव-शिवा·लयाय
बहु-रूपाय
महा-रूपाय
सर्व-रूपाय
चरा·चराय
न्याय-निर्वाहकाय
न्यायाय
न्याय-गम्याय
नि·रञ्जनाय (६५०)
सहस्र-मूर्ध्ने
देवे·न्द्राय
सर्व-शस्त्र-प्रभञ्जनाय
मुण्डाय
वि-रूपाय
वि-कृताय
दण्डिने
दान्ताय
गुणो·त्तमाय
पिङ्गला·क्षाय (६६०)
ह·र्यक्षाय
नील-ग्रीवाय
नि·रामयाय
सहस्र-बाहवे सर्वे·शाय
शरण्याय
सर्व-लोक-भृते
पद्मा·सनाय
परं-ज्योतिषे
परा·वर-परं-फलाय
पद्म-गर्भाय (६७०)
महा-गर्भाय
विश्व-गर्भाय
विचक्षणाय
परा·वर-ज्ञाय
बीजे·शाय
सु-मुखाय सु-महा-स्वनाय
देवा·सुर-गुरवे देवाय
देवा·सुर-नमस्कृताय
देवा·सुर-महा-मात्राय
देवा·सुर-महा·श्रयाय (६८०)
देवा·दि-देवाय
देव·र्षि-देवा·सुर-वर-प्रदाय
देवा·सुरे·श्वराय
दिव्याय
देवा·सुर-महे·श्वराय
सर्व-देव-मयाय
अचिन्त्याय
देवता·त्मने
आत्म-सम्भवाय
ईड्याय (६९०)
अनीशाय
सुर-व्याघ्राय
देव-सिंहाय
दिवा-कराय
विबुधा·ग्र-वर-श्रेष्ठाय
सर्व-देवो·त्तमो·त्तमाय
शिव-ज्ञान-रताय

श्री-मते
शिखि-श्री-पर्वत-प्रियाय
जय-स्तम्भाय (७००)
विशिष्ट·म्भाय
नरसिंह-निपातनाय
ब्रह्म-चारिणे
लोक-चारिणे
धर्म-चारिणे
धना·धिपाय
नन्दिने
नन्दी·श्वराय
नग्नाय
नग्न-व्रत-धराय (७१०)
शुचये
लिङ्गा·ध्यक्षाय
सुरा·ध्यक्षाय
युगा·ध्यक्षाय
युगा·वहाय
स्व-वशाय
स-वशाय
स्वर्ग-स्वराय
स्वर-मय-स्वनाय
बीजा·ध्यक्षाय (७२०)
बीज-कर्त्रे
धन-कृद्-धर्म-वर्धनाय
दम्भाय
अदम्भाय
महा-दम्भाय
सर्व-भूत-महे·श्वराय

श्मशान-निलयाय
तिष्याय
सेतवे
अप्रतिमा·कृतये (७३०)
लोको·त्तर-स्फुटा·लोकाय
त्र्यम्बकाय
नाग-भूषणाय
अन्धका·रये
मख-द्वेषिणे
विष्णु-कन्धर-पातनाय
वीत-दोषाय
अक्षय-गुणाय
दक्षा·रये
पूष-दन्त-हृते (७४०)
धू·र्जटये
खण्ड-परशवे
स-कलाय
निष्कलाय
अनघाय
आ-धाराय
सकला·धाराय
पाण्डुरा·भाय
मृडाय
नटाय (७५०)
पूर्णाय
पूरयित्रे
पुण्याय
सु-कुमाराय
सु-लोचनाय

साम-गेयाय
प्रिय-कराय
पुण्य-कीर्तये
अ-नाम-याय
मनो·जवाय (७६०)
तीर्थ-कराय
जटिलाय
जीविते·श्वराय
जीविता·न्त-कराय
नि-त्याय
वसु-रेतसे
वसु-प्रियाय
सद्-गतये
सत्-कृतये
सक्ताय (७७०)
काल-कण्ठाय
कला-धराय
मानिने
मान्याय
महा-कालाय
सद्-भूतये
सत्-परा·यणाय
चन्द्र-सञ्जीवनाय
शास्त्रे लोक-गूढाय
अमरा·धिपाय (७८०)
लोक-बन्धवे
लोक-नाथाय
कृत-ज्ञाय कृति-भूषणाय
अ·नपा·य्यक्षराय
का·न्ताय
सर्व-शास्त्र-भृतां वराय
तेजो·मयाय द्युति-धराय
लोक-मायाय
अग्र-ण्ये
अणवे (७९०)
शुचि-स्मिताय
प्रसन्ना·त्मने
दुर्जयाय
दुरतिक्रमाय
ज्योति·र्मयाय
निराकाराय
जग·न्नाथाय
जले·श्वराय
तुम्ब-वीणिने
महा-कायाय (८००)
वि-शोकाय
शोक-नाशनाय
त्रि-लोका·त्मने
त्रि-लोके·शाय
शुद्धाय
शुद्धये
रथा·क्ष-जाय
अव्यक्त-लक्षणाय
अ-व्यक्ताय
व्यक्ता·व्यक्ताय विशां पतये (८१०)
वर-शीलाय
वर-तुलाय
मानाय

मान-धनाय मयाय
ब्रह्मणे
विष्णवे प्रजा-पालाय
हंसाय
हंस-गतये
यमाय
वेधसे (८२०)
धात्रे
विधात्रे
अत्त्रे हर्त्रे
चतु·र्मुखाय
कैलास-शिखरा·वासिने
सर्वा·वासिने
सतां गतये
हिरण्य-गर्भाय
हरिणाय
पुरुषाय (८३०)
पूर्व-जाय पित्रे
भूता·लयाय
भूत-पतये
भूति-दाय
भुवने·श्वराय
संयोगिने
योग-विद्-ब्रह्मणे
ब्रह्मण्याय
ब्राह्मण-प्रियाय
देव-प्रियाय (८४०)
देव-नाथाय
देव-ज्ञाय
देव-चिन्तकाय
विषमा·क्षाय
कला·ध्यक्षाय
वृषा·ङ्काय
वृष-वर्धनाय
नि·र्मदाय नि·रहङ्काराय
नि·र्मोहाय
नि·रुपद्रवाय (८५०)
दर्प-घ्ने
दर्पिताय
दृप्ताय
सर्व·र्तु-परिवर्तकाय
सप्त-जिह्वाय
सहस्रा·र्चये
स्निग्धाय
प्रकृति-दक्षिणाय
भूत-भव्य-भव·न्नाथाय
प्रभवाय (८६०)
भ्रान्ति-नाशनाय
अर्थाय
अनर्थाय
महा-कोशाय
पर-कार्यै·क-पण्डिताय
नि·ष्कण्टकाय
कृता·नन्दाय
नि·र्व्याजाय
व्याज-मर्दनाय
सत्त्ववते (८७०)
सात्त्विकाय

सत्य-कीर्ति-स्तम्भ-कृता·गमाय
अकम्पिताय
गुण-ग्राहिणे
नै·का·त्मने नै·क-कर्म-कृते
सु-प्रीताय
सु-मुखाय
सूक्ष्माय
सु-कराय
दक्षिणाय (८८०)
अनलाय
स्कन्धाय
स्कन्ध-धराय
धुर्याय
प्रकटाय
प्रीति-वर्धनाय
अपराजिताय
सर्व-सहाय
विदग्धाय
सर्व-वाहनाय (८९०)
अधृताय
स्व-धृताय
साध्याय
पूर्त-मूर्तये
यशो·धराय
वराह-शृङ्ग-धृषे
वायवे
बलवते
एक-नायकाय
श्रुति-प्रकाशाय (९००)

श्रुति-मते
एक-बन्धवे
अनेक-धृषे
श्री-वल्लभ-शिवा·रम्भाय
शान्त-भद्राय
समञ्जसाय
भू-शयाय
भूति-कृद्-भूतये
भूषणाय
भूत-वाहनाय (९१०)
अकायाय
भक्त-काय-स्थाय
काल-ज्ञानिने
कला-वपुषे
सत्य-व्रत-महा-त्यागिने
निष्ठा-शान्ति-परा·यणाय
परा·र्थ-वृत्तये
वर-दाय
विविक्ताय
श्रुति-सागराय (९२०)
अनिर्विण्णाय
गुण-ग्राहिणे
कलङ्का·ङ्काय
कलङ्क-घ्ने
स्वभाव-रुद्-द्राय
मध्य-स्थाय
शत्रु-घ्नाय
मध्य-नाशकाय
शिखण्डिने

कवचिने (९३०)
शूलिने
चण्डिने
मुण्डिने
कुण्डलिने
मेखलिने
कवचिने
खड्गिने
मायिने संसार-सारथये
अमृत्यवे सर्व-दृशे
सिंहाय (९४०)
तेजो-राशये महा-मणये
अ-सङ्ख्येयाय
अप्रमेया·त्मने
वीर्यवते
कार्य-कोविदाय
वेद्याय
वेदा·र्थ-विद्-गोप्त्रे
सर्वा·चाराय
मुनी·श्वराय
अ-नुत्-तमाय (९५०)
दुराधर्षाय
मधुराय
प्रिय-दर्शनाय
सुरे·शाय
शरणाय
सर्वस्मै
शब्द-ब्रह्म-सतां गतये
काल-भक्षाय
कलङ्का·रये
कङ्कणी-कृत-वासुकये (९६०)
महे·ष्वासाय
मही-भर्त्रे
नि·ष्कलङ्काय
वि-शृङ्खलाय
द्यु-मणये तरणये
धन्याय
सिद्धि-दाय
सिद्धि-साधनाय
निवृत्ताय
संवृताय (९७०)
शिल्पाय
व्यूढो·रस्काय
महा-भुजाय
एक-ज्योतिषे
निरातङ्काय
नराय नारायण-प्रियाय
नि·र्लेपाय
नि·ष्प्रपञ्चा·त्मने
नि·र्व्यग्राय
व्यग्र-नाशनाय (९८०)
स्तव्य-स्तव-प्रियाय
स्तोत्रे व्यास-मूर्तये
अनाकुलाय
निरवद्य-पदो·पायाय
विद्या-राशये
अविक्रमाय
प्रशान्त-बुद्धये अक्षुद्राय

क्षुद्र-घ्ने
नित्य-सुन्दराय
धैर्या॰ग्र्य-धुर्याय (९९०)
धात्री॰शाय
शाकल्याय
शर्वरी-पतये
परमा॰र्थ-गुरवे दृष्टये
गुरवे
आश्रित-वत्सलाय
रसाय
रस-ज्ञाय
सर्व-ज्ञाय
सर्व-सत्त्वा॰वलम्बनाय (१०००)

❁

# मैत्रीं भजत

मैत्रीं भजत अखिल-हृज्जेत्रीम्
आत्मवदेव परानपि पश्यत।
युद्धं त्यजत स्पर्धां त्यजत
त्यजत परेष्वक्रममाक्रमणम्॥
जननी पृथिवी काम-दुघाऽऽस्ते
जनको देवः सकल-दयालुः।
दाम्यत दत्त दयध्वं जनताः
श्रेयो भूयात् सकल-जनानाम्॥
॥ इति श्री-काञ्ची-कामकोटि-मूलाम्नाय-सर्वज्ञ-पीठाधीश्वर-
श्रीमच्चन्द्रशेखरेन्द्रसरस्वती-शङ्कराचार्य-स्वामि-विरचितं मैत्री-गीतम् ॥

**Maitrim Bhajata!**

1. Practice friendship which can win everyone's hearts!
2. See others as you would see yourself!
3. Shun wars and (unnecessary) competition!
4. Stop improperly encroaching into others' (territory)!

5. Mother Earth is the (the divine cow Kamadhenu) fulfiller of (all) needs.
6. God (our) Father is benevolent towards all. (This being so what is gained by conflict!)
7. O people! Control your desires! Share (and enjoy)! Be merciful!
8. (By acting thus) may all people attain supreme prosperity!

This song, an upadesha of Shri Chandrashekharendra Sarasvati Shricharana, the 68th Shankaracharya of the Jagadguru Peetam our Shri Kanchi Kamakoti Mulamnaya Sarvajna Peetam, was sung by Smt M S Subbulakshmi on 1966 October 23 in today's world's highest civil administrative forum, the United Nations General Assembly.

❁

## ॥ अनुबन्धः – पुराणस्य अध्यायः ॥

### ऋषय ऊचुः

कथं देवेन वै सूत देव-देवा·न्महे·श्वरात्।
सुदर्शना·ख्यं वै लब्धं वक्तु·मर्हसि विष्णुना॥ १॥

### सूत उवाच

देवाना·मसुरे·न्द्राणा·मभव·च्च सुदारुणः।
सर्वेषा·मेव भूतानां विनाश-करणो महान्॥ २॥

ते देवाः शक्ति-मुसलैः सायकै·र्नत-पर्वभिः।
प्रभिद्यमानाः कुन्तै·श्च दुद्रुवु·र्भय-विह्वलाः॥ ३॥

पराजिता·स्तदा देवा देव-देवे·श्वरं हरिम्।
प्रणेमु·स्तं सुरे·शानं शोक-संविग्न-मानसाः॥ ४॥

तान् समीक्ष्या·थ भगवान् देव-देवे·श्वरो हरिः।
प्रणिपत्य स्थितान् देवा·निदं वचन·मब्रवीत्॥ ५॥

वत्साः कि·मिति वै देवा·श्च्युता·लङ्कार-विक्रमाः।
समागताः स-सन्तापा वक्तु·मर्हथ सुव्रताः॥ ६॥

तस्य तद् वचनं श्रुत्वा तथा-भूताः सुरो·त्तमाः।
प्रणम्या·हु·र्यथा-वृत्तं देव-देवाय विष्णवे॥ ७॥

भगवन् देव-देवे·श विष्णो जिष्णो जनार्दन।
दानवैः पीडिताः सर्वे वयं शरण·मागताः॥ ८॥

त्व·मेव देव-देवे·श गति·र्नः पुरुषो·त्तम।
त्व·मेव परमा·त्मा हि त्वं पिता जगता·मपि॥ ९॥

त्व·मेव भर्ता हर्ता च भोक्ता दाता जनार्दन।
हन्तु·मर्हसि तस्मात् त्वं दानवान् दानवा·र्दन॥ १०॥

दैत्या·श्च वैष्णवै·र्ब्राह्मै रौद्रै·र्याम्यैः सुदारुणैः।
कौबेरै·श्चै·व सौम्यै·श्च नैर्ऋत्यै·र्वारुणै·र्दृढैः॥ ११॥

वायव्यै·श्च तथा·ग्नेयै·रैशानै·र्वार्षिकैः शुभैः।
सौरै रौद्रै·स्तथा भीमैः कम्पनै·र्जृम्भणै·र्दृढैः॥ १२॥

अवध्या वर-लाभात् ते सर्वे वारिज-लोचन।
सूर्य-मण्डल-सम्भूतं त्वदीयं चक्र·मुद्यतम्॥ १३॥

कुण्ठितं हि दधीचेन च्यावनेन जगद्-गुरो।
दण्डं शार्ङ्गं तवा·स्त्रं च लब्धं दैत्यैः प्रसादतः॥ १४॥

पुरा जलन्धरं हेतुं निर्मितं त्रि-पुरा·रिणा।
रथा·ङ्गं सुशितं घोरं तेन तान् हन्तु·मर्हसि॥ १५॥

तस्मात् तेन निहन्तव्या ना·न्यैः शस्त्र-शतै·रपि।
ततो निशम्य तेषां वै वचनं वारिजे·क्षणः॥ १६॥
वाचस्पति-मुखा·नाह स हरि·श्चक्र-भृत् स्वयम्।

**श्री-विष्णु·रुवाच**

भो भो देवा महा-देवं सर्वै·र्देवैः सनातनैः ॥ १७ ॥

सम्प्राप्य साम्प्रतं सर्वं करिष्यामि दिवौ·कसाम्।
देवा जलन्धरं हन्तुं निर्मितं हि पुरा·रिणा ॥ १८ ॥

लब्ध्वा रथा·ङ्गं तेनै·व निहत्य च महा·सुरान्।
सर्वान् धुन्धु-मुखान् दैत्यान् अष्ट-षष्टि-शतान्, सुरान् ॥ १९ ॥
स-बान्धवान् क्षणा·देव युष्मान् सन्तारया·म्यहम्।

**सूत उवाच**

एव·मुक्त्वा सुर-श्रेष्ठान् सुर-श्रेष्ठ·मनुस्मरन् ॥ २० ॥

सुर-श्रेष्ठ·स्तदा श्रेष्ठं पूजयामास शङ्करम्।
लिङ्गं स्थाप्य यथा-न्यायं हिमव·च्छिखरे शुभे ॥ २१ ॥

मेरु-पर्वत-सङ्काशं निर्मितं विश्व-कर्मणा।
त्वरिता·ख्येन रुद्रेण रौद्रेण च जनार्दनः ॥ २२ ॥

स्नाप्य सम्पूज्य गन्धा·द्यै·र्ज्वाला·कारं मनो·रमम्।
तुष्टाव च तदा रुद्रं सम्पूज्या·ग्नौ प्रणम्य च ॥ २३ ॥

देवं नाम्नां सहस्रेण भवा·द्येन यथा-क्रमम्।
पूजयामास च शिवं प्रणवा·द्यं नमो·न्तकम् ॥ २४ ॥

देवं नाम्नां सहस्रेण भवा·द्येन महे·श्वरम्।
प्रति-नाम स पद्मेन पूजयामास शङ्करम् ॥ २५ ॥

अग्नौ च नामभि·र्देवं भवा·द्यैः समि·दादिभिः।
स्वाहा·न्तै·र्विधिव·द्धुत्वा प्र·त्येक·मयुतं प्रभुम् ॥ २६ ॥
तुष्टाव च पुनः शम्भुं भवा·द्यै·र्भव·मीश्वरम्।

**श्री-विष्णु·रुवाच**

**[स्तोत्रम्]**

**सूत उवाच**

एवं नाम्नां सहस्रेण तुष्टाव वृषभ-ध्वजम् ॥ १५९ ॥

स्नापयामास च विभुः पूजयामास पङ्कजैः।
परीक्षा·र्थं हरेः पूजा-कमलेषु महे·श्वरः॥ १६०॥

गोपयामास कमलं तदै·कं भुवने·श्वरः।
हृत-पुष्पो हरि·स्तत्र कि·मिदं ·त्वभ्यचिन्तयत्॥ १६१॥

ज्ञात्वा स्व-नेत्र·मुद्धृत्य सर्व-सत्त्वा·वलम्बनम्।
पूजयामास भावेन नाम्ना तेन जगद्-गुरुम्॥ १६२॥

तत·स्तत्र विभु·र्दृष्ट्वा तथा-भूतं हरो हरिम्।
तस्मा·द्वततारा·शु मण्डलात् पावकस्य च॥ १६३॥

कोटि-भास्कर-सङ्काशं जटा-मुकुट-मण्डितम्।
ज्वाला-माला·वृतं दिव्यं तीक्ष्ण-दंष्ट्रं भयं-करम्॥ १६४॥

शूल-टङ्क-गदा-चक्र-कुन्त-पाश-धरं हरम्।
वरदा·भय-हस्तं च द्वीपि-चर्मो·त्तरीयकम्॥ १६५॥

इत्थं-भूतं तदा दृष्ट्वा भवं भस्म-विभूषितम्।
हृष्टो नम·श्चकारा·शु देव-देवं जनार्दनः॥ १६६॥

दुद्रुवु·स्तं परिक्रम्य से·न्द्रा देवा·स्त्रि-लोचनम्।
चचाल ब्रह्म-भुवनं चकम्पे च वसुन्धरा॥ १६७॥

ददाह तेज·स्त·च्छम्भोः प्रान्तं वै शत-योजनम्।
अधस्ता·च्चोर्ध्वत·श्चै·व हाहे·त्यकृत भूतले॥ १६८॥

तदा प्राह महादेवः प्रहस·न्निव शङ्करः।
सम्प्रेक्ष्य प्रणयाद् विष्णुं कृता·ञ्जलि-पुटं स्थितम्॥ १६९॥

ज्ञातं मये·द·मधुना देव-कार्यं जनार्दन।
सुदर्शना·ख्यं चक्रं च ददामि तव शोभनम्॥ १७०॥

यद् रूपं भवता दृष्टं सर्व-लोक-भयं-करम्।
हिताय तव यत्नेन तव भावाय सुव्रत॥ १७१॥

शान्तं रणा·जिरे विष्णो देवानां दुःख-साधनम्।
शान्तस्य चा·स्त्रं शान्तं स्या·च्छान्तेना·स्त्रेण किं फलम्॥ १७२॥

शान्तस्य समरे चा·स्त्रं शान्ति·रेव तपस्विनम्।
योद्धुः शान्त्या बल-च्छेदः परस्य बल-वृद्धि-दः॥ १७३॥

देवै·रशान्तै·र्यद् रूपं मदीयं भावया·व्ययम्।
कि·मायुधेन कार्यं वै योद्धुं देवा·रि-सूदन॥ १७४॥

क्षमा युधि न कार्या वै योद्धुं देवा·रि-सूदन।
अनागते व्यतीते च दौर्बल्ये स्व-जनो·त्करे॥ १७५॥

अकालिके ·त्वधर्मे च अनर्थे वाऽरि-सूदन।
एव·मुक्त्वा ददौ चक्रं सूर्या·युत-सम-प्रभम्॥ १७६॥

नेत्रं च नेता जगतां प्रभु·र्वै पद्म-सन्निभम्।
तदा-प्रभृति तं प्राहुः पद्मा·क्ष·मिति सु-व्रतम्॥ १७७॥

दत्त्वै·नं नयनं चक्रं विष्णवे नील-लोहितः।
पस्पर्श च कराभ्यां वै सुशुभाभ्या·मुवाच ह॥ १७८॥

वरदोऽहं वर-श्रेष्ठ वरान् वरय चे·प्सितान्।
भक्त्या वशी-कृतो नूनं त्वयाऽहं पुरुषो·त्तम॥ १७९॥

इ·त्युक्तो देव-देवेन देव-देवं प्रणम्य तम्।
त्वयि भक्ति·र्महादेव प्रसीद वर·मुत्तमम्॥ १८०॥

ना·न्य·मिच्छामि भक्ताना·मार्तयो ना·स्ति यत् प्रभो।
त·च्छ्रुत्वा वचनं तस्य दयावान् सुतरां भवः॥ १८१॥

पस्पर्श च ददौ तस्मै श्रद्धां शीतां·शु-भूषणः।
प्राह चै·वं महा-देवः परमा·त्मान·मच्युतम्॥ १८२॥

मयि भक्त·श्च वन्द्य·श्च पूज्य·श्चै·व सुरा·सुरैः।
भविष्यसि न सन्देहो मत्-प्रसादात् सुरो·त्तम॥ १८३॥

यदा सती दक्ष-पुत्री विनिन्द्यै·व सुलोचना।
मातरं पितरं दक्षं भविष्यति सुरे·श्वरी॥ १८४॥

दिव्या हैमवती विष्णो तदा त्व·मपि सुव्रत।
भगिनीं तव कल्याणीं देवीं हैमवती·मुमाम्॥ १८५॥

नियोगाद् ब्रह्मणः साध्वीं प्रदास्यसि ममै·व ताम्।
मत्-सम्बन्धी च लोकानां मध्ये पूज्यो भविष्यसि॥ १८६॥

मां दिव्येन च भावेन तदा प्रभृति शङ्करम्।
द्रक्ष्यसे च प्रसन्नेन मित्र-भूत·मिवा·त्मना॥ १८७॥

इ·त्युक्त्वाऽन्त·र्दधे रुद्रो भगवान् नील-लोहितः।
जनार्दनोऽपि भगवान् देवाना·मपि सन्निधौ॥ १८८॥

अयाचत महादेवं ब्रह्माणं मुनिभिः समम्।
मया प्रोक्तं स्तवं दिव्यं पद्म-योने सुशोभनम्॥ १८९॥

यः पठे·च्छृणुयाद् वाऽपि श्रावयेद् वा द्विजो·त्तमान्।
प्रतिनाम्नि हिरण्यस्य दत्तस्य फल·माप्नुयात्॥ १९०॥

अश्वमेध-सहस्रेण फलं भवति तस्य वै।
घृता·द्यैः स्नापयेद् रुद्रं स्थाल्या वै कलशैः शुभैः॥ १९१॥

नाम्नां सहस्रेणा·नेन श्रद्धया शिव·मीश्वरम्।
सोऽपि यज्ञ-सहस्रस्य फलं लब्ध्वा सुरे·श्वरैः॥ १९२॥

पूज्यो भवति रुद्रस्य प्रीति·र्भवति तस्य वै।
तथाऽ·स्त्विति तथा प्राह पद्म-योनि·र्जनार्दनम्॥ १९३॥

जग्मतुः प्रणिपत्यै·नं देव-देवं जगद्-गुरुम्।
तस्मा·न्नाम्नां सहस्रेण पूजये·दनघो द्विजाः।
जपे·न्नाम्नां सहस्रं च स याति परमां गतिम्॥ १९४॥

॥ इति श्री-लिङ्ग-महा-पुराणे पूर्व-भागे सहस्र-नामभिः पूजनाद् विष्णु-चक्र-लाभो नाम अष्टनवतितमोऽध्यायः ॥

❁❁❁